सुखोष्णैरुपनाहैश्च वातोत्तरमुपाचरेत् ॥
विरेचनघृतक्षीरपानैः सेकैः सवस्तिभिः ।
शीतैर्निर्वापनैश्चापि रक्तपित्तोत्तरं जयेत् ॥
वमनं मृदुनात्यर्थं स्नेहसेकादिलङ्घनम् ।
कोष्णालेपाश्च शस्यन्ते वातरक्ते कफोत्तरे ॥
कफवातोत्तरे शीतैः प्रलिप्ते वातशोणिते ।
विदाहः शोथरुक्कण्डूविवृद्धिः स्तम्भनाद्भवेत् ॥
पित्तरक्तोत्तरे दाहः क्लेदोऽवदरणं भवेत् ।
उष्णैस्तस्माद्भिषग्दोषबलं बुद्ध्वाचरेत् क्रियाम् ॥"
"द्राक्षापरूषकद्राक्षाकाश्मर्य्येक्षुरसान् समान् ।
पृथग्विदार्य्याश्च रसं तथा क्षीरचतुर्गुणम् ॥
एतत् प्रायोगिकं सर्पिः पारूषकमिति स्मृतम् ।
वातरक्ते क्षते क्षीणे वीसर्पे पैत्तिके ज्वरे ॥"
इति पारूषकं घृतम् ॥*॥
"मधुपर्ण्याः पलं पिष्ट्वा तैलप्रस्थं चतुर्गुणे ।
क्षीरे साध्यं शतक्लृप्तदेवं मधुकात् शते ॥
सिद्धं देयं त्रिदोषे स्यात् वातासृक्श्वासकासनुत् ।
हृत्पाण्डुरोगवीसर्पकामलादाहनाशनम् ॥
बलाकषायकल्काभ्यां तैलं क्षीरसमन्तया ।
सहस्रशतपाकं वा वातासृग्वातरोगनुत् ॥
रसायनं श्रेष्ठतमं इन्द्रियाणाम्प्रसादनम् ।
जीवनं वृंहणं स्वर्य्यं शुक्रासृग्दोषनाशनम् ॥"
"चन्द्रपादाम्बुसंसिक्ते क्षौमपद्मदलच्छदे ।
शयने पुलिनस्पर्शे शीतमारुतवीजिते ॥
चन्दनार्द्रकरार्द्राङ्ग्यः प्रिया नार्य्यः प्रियंवदाः ।
स्पर्शात् शीतसुखस्पर्शा घ्नन्ति दाहं रुजं क्लमम् ॥"
"गम्भीरे रक्तमाक्रान्तं स्याच्चेद्वातुं विवर्ज्जयेत् ।
रक्तपित्तातिवृद्ध्या तु पाकमाशु नियच्छति ॥
भिन्नं स्रवति वा रक्तं विदग्धं पूयमेव वा ।
तयोः क्रिया विधातव्याः व्यधः शोधनरोपणौ ॥
कुर्य्यादुपद्रवाणाञ्च क्रियां स्यात् स्वाच्चिकित्-
सितात् ॥"
इति चरके चिकित्सास्थाने २९ अध्यायः ॥
"गन्धकं पारदं लौहं वनं तालं मनःशिला ।
शिलाजतु पुरं शुद्धं समभागं विचूर्णयेत् ॥
विड़ङ्गं त्रिफला चोषं वारुणी च पुनर्नवा ।
चित्रकं देवकाष्ठञ्च दार्व्वी श्वेतापराजिता ॥
चूर्णमेषां पृथक् तुल्यं सर्व्वमेकत्र कारयेत् ।
त्रिफलाभृङ्गराजस्य रसेनैव पृथक् त्रिधा ॥
विभाव्य भक्षयेत् प्रातर्माषमात्रं दिने दिने ।
क्रमानुपानं निम्बस्य पत्रं पुष्पं त्वचं समम् ॥
शाणमात्रं घृतैर्दद्यात् सर्व्ववातविकारनुत् ।
वातरक्तं महाघोरं गम्भीरं सर्व्वजञ्जयेत् ॥
सर्व्वोपद्रवसंयुक्तं साध्यासाध्यं निहन्त्यलम् ॥"
इति वातरक्तान्तको रसः ॥*॥
"अथ शुद्धेन तालेन गन्धतुल्येन मेलयेत् ।
द्वयोस्तुल्यं जीर्णताम्रं वालुकायन्त्रके पचेत् ॥
अयन्तालेश्वरो नाम रसः परमदुर्लभः ।
हन्यात् कुष्ठानि सर्व्वाणि वातरक्तमथापि वा ।
शूलमष्टविधं श्वित्रं रसस्तालेश्वरो महान् ॥"
इति महातालेश्वरो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे वातरक्ताधिकारे ॥

अथात्र पथ्यापथ्यविधिः ।
"द्वयोरस्रस्रुतिः स्नेहजलौकाश्मलाबुभिः ।
शतधौतघृताभ्यङ्गो मेषीदुग्धावसेचनम् ॥
यवषष्टीकनीवारकलमारुणशालयः ।
गोधूमाश्चणका मुद्गास्तुवर्य्योऽपि मुकुष्टकाः ॥
अजानां महिषीणाञ्च गवामपि पयांसि च ।
लावतित्तिरिसर्पेहिट्ताम्रचूड़ादिविष्किराः ॥
प्रतुदाः शुकदात्यूहकपोतकटकादयः ।
उपोदिकाकाकमाची वेत्राग्रं सुनिषण्णकम् ॥
वास्तुकं कारवेल्लञ्च तण्डुलीयः प्रसारणी ।
पत्तूरो वृद्धकुष्माण्डं सर्पिः शम्याकपल्लवम् ॥
पटोलं रुवुतैलञ्च मृद्वीकाश्वेतशर्करा ।
नवनीतं सोमवल्ली कस्तूरी सितचन्दनम् ॥
शिंशपागुरुदेवाह्वसरलं स्नेहमर्द्दनम् ।
तिक्तञ्च पथ्यमुद्दिष्टं वातरक्तगदे नृणाम् ॥
दिवास्वप्नाग्निसन्तापव्यायामातपमैथुनम् ।
माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनम् ॥
अम्बुजानूपमांसानि विरुद्धानि दधीनि च ।
इक्षवो मूलकं मद्यं पिण्याकोऽम्लानि काञ्जिकम् ॥
कटुष्णं गुर्व्वभिष्यन्दि लवणानि च शक्तवः ।
इत्यपथ्यं निगदितं वातरक्तगदे नृणाम् ॥"
इति वैद्यकपथ्यापथ्यविधिग्रन्थे वातरक्ताधिकारः ॥)

वातरक्तघ्नः, पुं, ( वातरक्तं रोगविशेषं हन्तीति । हन+टक् । ) कुकुरद्रुः । इति शब्दचन्द्रिका ॥ कुकुरसुड़ा इति भाषा ॥

वातरक्तारिः, पुं, ( वातरक्तस्य अरिर्नाशकः । ) पित्तघ्नी लता । इति शब्दचन्द्रिका ॥ गुलञ्च इति भाषा ॥

वातरङ्गः, पुं, ( वातेन वायुना रङ्गो यस्य । निरन्तरचलदलत्वादस्य तथात्वम् । ) अश्वत्थः । इति शब्दरत्नावली ॥

वातरथः, पुं, ( वातो वायू रथो यस्य । ) मेघः । इति त्रिकाण्डशेषः ॥ ( वातो रथः प्रापको यस्येति वायुप्रापके, त्रि । यथा, भागवते । ३ । २९ । २० ।
"यथा वातरथो घ्राणमावृङ्क्ते गन्ध आशयात् ।
एवं योगरतं चेत आत्मानमविकारि यत् ॥")

वातरायणः, पुं, (वातेन वायुजनितरोगेण रायति शब्दायते इति । रै शब्दे+ल्युः । ) उन्मत्तः । निष्प्रयोजनपुरुषः । काण्डम् । करपात्रम् । कूटः । परसंक्रमः । इति मेदिनी । ने, ११६ ॥ सरलद्रुमः । इति शब्दरत्नावली ॥

वातरूषः, पुं, ( वातेन रूष्यते भूष्यते इति । रूष +घञ् । ) वातूलः । उत्कोचः । शक्रधनुः । इति मेदिनी । षि, ५७ ॥

वातरोगः, पुं, (वातजनितो रोगः ।) वायुव्याधिः । तत्पर्य्यायः । वातव्याधिः २ चलातङ्कः ३ अनिलामयः ४ । इति राजनिर्घण्टः ॥ (यथा,
"वातरोगं निहन्त्याशु अर्द्दितं सापतन्त्रकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे वातव्याधौ स्वल्परसोनपिण्डे ॥ )

वातरोगी [ न् ] त्रि, (वातरोगोऽस्यास्तीति । वातरोग+इनिः । ) वातरोगयुक्तः । तत्पर्य्यायः । वातकी २ । इत्यमरः ॥ ( यथा, वृहत्संहितायाम् । ८७ । ११ ।
"परतोऽपि दर्शनं वातरोगिणां चन्दनागुरुप्राप्तिः ॥")

वातर्हिः, पुं, काष्ठलौहोभयनिर्मितपात्रम् । तत्पर्य्यायः । काष्ठलौही २ । इति त्रिकाण्डशेषः ॥

वातलः, पुं, ( वातं लातीति । ला+कः । ) चणकः । इति शब्दचन्द्रिका ॥ वायुकारके त्रि ॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अः ।
"वातलाः शीतमधुराः सकषाया विरूक्षणाः ।
कफशोणितपित्तघ्नाश्चणकाः पुंस्त्वनाशनाः ॥")

वातलमण्डली, स्त्री, वात्या । इति भूरिप्रयोगः ॥

वातवान् [ त् ] त्रि, वायुयुक्तः । वातो विद्यतेऽस्य इत्यर्थे वतुप्रत्ययेन निष्पन्नः ॥

वातवैरी [ न् ], पुं, ( वातस्य वैरी । ) वातारः । इति राजनिर्घण्टः ॥ वायुशत्रौ, त्रि ॥

वातव्याधिः, पुं, ( वातजनितो व्याधिः ।) वातरोगः । इति राजनिर्घण्टः ॥ ( यथा,
"शूनं सुप्तत्वचं भग्नं कम्पाध्माननिपीड़ितम् ।
रुजार्त्तिमन्तञ्च नरं वातव्याधिर्विनाशयेत् ॥"
इति माधवकरकृते रुग्विनिश्चये वातरोगाधिकारे शेषांशे ॥ )

वातशीर्षं, क्ली, ( वातस्य शीर्षमिव । ) वस्तिः । इति राजनिर्घण्टः ॥

वातशोणितं, क्ली, ( वातजं शोणितं दुष्टरक्तं यत्र । ) वातरक्तरोगः । इति भावप्रकाशः ॥ ( अस्य सनिदानसम्प्राप्तिकं पूर्व्वरूपं लक्षणञ्च यथा,—
"विदाह्यन्नं विरुद्धञ्च तत्तच्चारुक्प्रदूषणम् ।
भजतां विधिहीनञ्च स्वप्नजागरमैथुनम् ॥
प्रायेण सुकुमाराणामचंक्रमणशीलिनाम् ।
अभिघातादशुद्ध्या च नृणामसृजि दूषिते ॥
वातलैः शीतलैर्वायुर्वृद्धः क्रुद्धो विमार्गगः ।
तादृशेनासृजा रुद्धः प्राक् तदेव प्रदूषयेत् ॥
आढ्यरोगं खुड़ं वातबलासं वातशोणितम् ।
तदाहुर्नामभिस्तच्च पूर्व्वं पादौ प्रधावति ॥
विशेषाद्यानयानाद्यैः प्रलम्बौ तस्य लक्षणम् ।
भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता ॥
जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु ।
कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः ॥
भूत्वा भूत्वा प्रणश्यन्ति मुहुराविर्भवन्ति च ।
पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ॥
आखोरिव विषं क्रुद्धं तत्सर्व्वं देहं विधावति ।
त्वङ्मांसाश्रयमुत्तानं तत्पूर्व्वं जायते ततः ॥
कालान्तरेण गम्भीरं सर्व्वान् धातूनभिद्रवत् ।
कण्ड्वादिसंयुतोत्ताने त्वक्ताम्रश्यावलोहिता ॥
सायामा भृशदाहोष्मा गम्भीरेऽधिकपूर्व्वरुक् ।
श्वयथुर्ग्रथितः पाकी वायुः सन्ध्यस्थिमज्जसु ॥
छिन्दन्निव चरत्यन्तर्वक्रीकुर्व्वंश्च वेगवान् ।